# शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र दिल्ली

## अभ्यासप्रश्नपत्रम् (सत्रम्– 2024-25)

## विषयः – संस्कृतम्

**कक्षा - दशमी** **संस्कृतम् (कोड-122)**

**अवधिः– होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | | |
|---|---|---|
| खण्डः- क | अपठितांश – अवबोधनम् | 10 अङ्काः |
| खण्डः- ख | रचनात्मककार्यम् | 15 अङ्काः |
| खण्डः- ग | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| खण्डः- घ | पठित-अवबोधनम् | 30 अङ्काः |

### खण्डः- क

**अपठितांश – अवबोधनम्** **10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

विशिष्टं ज्ञानं विज्ञानं कथ्यते। विज्ञानबलेन संसारे विविधानि चमत्कारपूर्णानि वस्तूनि आविष्कृतानि जातानि। विज्ञानस्य चमत्कारेण अधुना सर्वत्र आश्चर्यजनकानि वस्तूनि दृश्यन्ते। समुद्रे विशालानि जलयानानि निर्भयं गच्छन्ति। विशाले गगने वायुयानेन मानवाः अन्यदेशं शीघ्रं गच्छन्ति। विद्युत्-बलेन शीतकाले उष्णता ग्रीष्मकाले च शैत्यं प्राप्यते। अतिविशालानि उन्नतानि च भवनानि विज्ञानेन निर्मीयन्ते। आधुनिके युगे चलदूरवाणी, दूरदर्शनम्, संगणकं, रेडियो, इन्टरनेट इत्यादीनि सर्वसुलभानि जातानि। सुखोपभोगाय अनेकानि उपकरणानि आविष्कृतानि जातानि येन अस्माकं जीवनं सुलभं जातम्। सम्प्रति विज्ञानं हि अस्माकं मानवसभ्यतायाः मूलम् वर्तते।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) विशिष्टं ज्ञानं किं कथ्यते?

(ii) समुद्रे विशालानि जलयानानि कथं गच्छन्ति?

(iii) सम्प्रति अस्माकं मानवसभ्यतायाः मूलम् किं वर्तते। ?

**ब) पूर्णवाक्येन लिखत (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) संसारे कानि आविष्कृतानि जातानि?

(ii) विद्युत्-बलेन कि–किं प्राप्यते?

(iii) आधुनिके युगे कानि सर्वसुलभानि जातानि?

**इ.) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **1x3=3**

**(i)** 'विशिष्टं ज्ञानं विज्ञानं कथ्यते' अत्र किं क्रियापदम्?

(क) विशिष्टं (ख) कथ्यते (ग) ज्ञानं विज्ञानं

**(ii)** विशालानि जलयानानि अनयोः विशेष्यपदं किम् ?

(क) विशालानि (ख) जलयानानि (ग) किमपि न

**(iii)** 'दुर्लभं' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) सुलभम् (ख) सुकरम् (ग) सरलम्

**(iv)** 'विद्युत्-बलेन शीतकाले उष्णता ग्रीष्मकाले च शैत्यं प्राप्यते' अस्मिन् वाक्ये किम् अव्ययपदं किं प्रयुक्तम्?

(क) विद्युत्-बलेन (ख) च (ग) प्राप्यते

**खण्ड: ख - रचनात्मककार्यम्** **15 अङ्काः**

**2. स्वमित्रं एकादश-कक्षायां संस्कृतं पठितुं प्रेरयितुं लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।** **½ x10=5**

छात्रावासः

(i)...................... दिनाङ्कः

......................

प्रिय आदित्य,

(ii)......................

अत्र कुशलं तत्रास्तु। तव (iii)...................... ज्ञातं यत् त्वम् एकादश कक्षायां संस्कृतं पठितुम् इच्छसि। एतत् ज्ञात्वा अहम् अतिप्रसन्नः(iv) ...................... यतः संस्कृतम् पठित्वा वयं स्वदेशस्य गौरवम् अनुभवितुं (v) ......................। इयं देवभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा वैज्ञानिकी च अस्ति। विश्वस्य (vi) ......................भाषासु भारतीयभाषासु च (vii)...................... शब्दाः प्राप्यन्ते। किं त्वं जानासि यत् वेदाः, रामायणम्, महाभारतम्, उपनिषदः, पञ्चतन्त्र–हितोपदेशादयः (viii)...................... संस्कृते एव लिखिताः सन्ति। अतः त्वं सर्वैः(ix)...................... सह संस्कृतम् अपि परिश्रमेण पठ। अवकाशेषु मम गृहम् आगच्छ। मातापितृभ्यां मम प्रणामान् कथय।

तव (x)......................

वैभवः।

**मञ्जूषा**

| |
|---|
| अभवम्, नमोनमः, मित्रम्, शक्नुमः, विषयैः, देहरादूनतः, संस्कृतस्य, अनेकासु, पत्रेण, ग्रन्थाः |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** **1x5=5**



**मञ्जूषा**

| |
|---|
| अध्यापिका, छात्राः, चित्रम्, पाठयति, पठन्ति, श्रृण्वन्ति, पृच्छन्ति, आदर्शवाचनम्, उत्पीठिका, पुस्तकम्, मार्जनी बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका, तिष्ठन्ति ध्यानेन, श्रृण्वन्ति, स्मितहासं, लेखनी, मन्दं–मन्दं , भित्तौ, हसन्ति |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**

"देशस्य सैनिकाः"

**मञ्जूषा-**

**4.**

| |
|---|
| आरात्रौ, भटाः, देशरक्षां, कुर्वन्ति, आदिवसं, दमनं, सीमाप्रहरी, शत्रूणां, घ्नन्ति, जनाः, वसन्ति, सुखेन, परिवाराः, सुरक्षिताः, भवन्ति, अधिकारिणः, सैनिकाः, आदिशन्ति, परिपालयन्ति |

**अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवल वाक्यपञ्चकम्) 1x5=5**

1. मैं गुरुकुल में रहता हूं। I live in the gurukula.

2. मेरे पिताजी क्लर्क है। My father is a cleark .

3. मेरी माता अध्यापिका है। My mother is a teacher.

4. वह सोमवार को मुम्बई जाएगा। He will go to Mumbai on Monday.

5. हम लोग वहाँ कब जाओगे। When will we go there.

6. वर्षा हो रही है। It is raining.

**'ग'-खण्ड:**

**अनुप्रयुक्त-व्याकरणम्**

**5. अधोलिखितेषु वाक्येषु रेखांकितपदस्य सन्धिपदं सन्धिच्छेदपदं वा लिखत (केवलं प्रश्नचतुष्टयम्) 1x4=4**

I. **<u>नास्त्युद्यमसमो बन्धुः</u> कृत्वा यं नावसीदति।**

II. कथं **<u>जनः+तं</u>** परितोषयिष्यति।

III. **<u>अश्वश्चेद्</u>** धावने वीरः भारस्य वहने खरः।

IV. **<u>काचित्+इयमिति</u>** मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

V. मुच्यते **<u>महतः+भयात्</u>**।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) पाषाणीसभ्यतायां **<u>लतातरुगुल्माः</u>** पिष्टाः भवन्ति।

(क) लताश्च तरवश्च गुल्माश्च (ख) लतातरुगुल्म यस्य ते (ग) लतां च ते तरुगुल्माः

(ii) कुत्सितवस्तुमिश्रितं भक्ष्यं **<u>समलं</u>** धरातलम्

(क) मलाद् युक्तम् (ख) मलेन सहितम् (ग) मलं युक्तम्

(iii) बलीवर्दाभ्यां **क्षेत्रकर्षणं** कुर्वन्नासीत्।

(क) क्षेत्रस्य कर्षणस्य (ख) क्षेत्रस्य कर्षणं (ग) क्षेत्रे कर्षन्ति

(iv) राजसिंहः नाम **राजपुत्रः** वसति स्म।

(क) राजः पुत्रः (ख) राजानः पुत्रः (ग) राज्ञः पुत्रः

(v) **पश्चात् व्रजन्ति** सख्याः।

(क) पश्चाति (ख) अनुव्रजन्ति (ग) पश्चात्व्रजन्ति।

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) विद्वत्वं च **नृपत्वं** च नैव तुल्यं कदाचन।

(क) नृप + त्त्वं (ख) नृप + त्व (ग) नृप + त्वम्

(ii) **अध्यापिका** पाठं पाठयति।

(ख) अध्यापक + डाप् (ग) अध्याप + इका (ग) अध्यापक + टाप्

(iii) सर्वेषामेव **महत्त्वं** विद्यते यथासमयम्।।

(क) मह + त्त्वं (ख) महत् + त्व (ग) महत् + त्वम्

(iv) माला **रमणीया**।

(क) रम + णीया (ख) रमणी + या (ग) रमणीय + टाप्

(v) यत्रास्ते सा **धूर्ता** तत्र गम्यताम्।

(क) धु + र्ता (ख) धूर्त + टाप् (ग) धुर्त + डाप्

**8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं विकल्पेन पूरयत। (केवलं प्रश्नत्रयम्) 1x3=3**

(i) प्रियंका – रोहित! i)........ किं पठसि?

(क) त्वम् (ख) अहम् (ग) त्वया

(ii) रोहितः - मया संस्कृतस्य पुस्तकम् ii) …….।

(क) पठ्यते (ख) पठामि (ग) पठसि

(iii) प्रियंका – उत्तमम्! तव iii)…….……. शुद्धं वर्तते।

(क) श्लोकोच्चारणः (ख) श्लोकोच्चारणम् (ग) श्लोकोच्चारण

(iv) आम्! प्रतिदिनम् iv)……….. श्लोकोच्चारणस्य अभ्यासः क्रियते।

(क) अहम् (ख) त्वम् (ग) मया

**9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) अहम् प्रातः 5:30……. जागरणम् करोमि।

(क) पादोनपञ्चवादने (ख) सपादपञ्चवादने (ग) सार्धपञ्चवादने

(ii) रमेश: 7:45 ……… अल्पाहारं स्वीकरोति।

(क) सपाद-अष्टवादने (ख) पादोन-अष्टवादने (ग) पादोन-सप्तवादने

(iii) माता 9.15 …………. मन्दिरम् गच्छति।

(क) सार्ध- नववादने (ख) सपाद-नववादने (ग) पादोन-नववादने

(iv) छात्रा: 9:15 ……………… विद्यालयं गच्छति।

(क) पादोननववादने (ख) सार्धनववादने (ग) सपाद नववादने

(v) शिक्षक: 12:45 ……..… गणितं पाठयति।

(क) पादोनद्वादशवादने (ख) पादोन-एकवादने (ग) सार्ध-एकवादने

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) 1x3=3**

(i) ....... अवकाश: भविष्यति।

(ii) त्वम् ........ पठिष्यति?

(iii) ………. त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

(iv) करणीयं बहिरन्तर्जगति तु ………….. शुद्धीकरणम्।

**मञ्जूषा**

| |
|---|
| बहु , श्वः, कदा, यदि |

**11. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्ध पदं विकल्पेभ्यः चिनुत-(केवलं प्रश्नत्रयम्) 1x3=3**

(i) अहम् क्रीडाक्षेत्रे **क्रीडति।**

(क) क्रीडसि (ख) क्रीडाम: (ग) क्रीडामि

(ii) सिंह: **भयङ्करः** वने निवसति।

(क) भयङ्करे (ख) भयङ्कर: (ग) भयङ्करम्

(iii) **सः** भोजनं कुरु।

(क) रामः (ख) अहम्  (ग) त्वम्

(iv) ता: सुन्दर्य: **<u>बालिका</u>** नृत्यन्ति।

(क) बालका:  (ख)  बालिक्य:  (ग) बालिका:

**घ–खण्डः**

**पठितावबोधनम्**

**12.  अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -  5**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपटेया प्रहृत्य जगाद- ''कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।" इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

**(अ)  एकपदेन उत्तरत-  (केवलं प्रश्नद्वयम्)  ½ x2=1**

(क)  ग्रामस्य नाम किम् अस्ति?

(ख) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता?

(ग) राजपुत्रस्य नाम किम् अस्ति?

**(आ)  पूर्णवाक्येन उत्तरत  (केवलं प्रश्नद्वयम्)  1x2=2**

(क) सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

(ख) राजपुत्रः कुत्र वसति स्म?

(ग) बुद्धिमती कुत्र व्याघ्रं ददर्श?

**(इ.)  यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)  1x2=2**

(क) ' वसति स्म' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(ख)  'मार्गे गहनकानने' अनयोः पदयोः विशेषणं किम् ?

(ग) 'वने' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **5**

**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।**

**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥**

**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचिपर्यावरणम् ..**

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x2=1**

(क) किम् भृशं दूषितम् अस्ति?

(ख) धरातलं केन युक्तम् अस्ति?

(ग) भक्ष्यं कीदृशम् अस्ति?

**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1x2=2**

(क) कीदृशं जलं नास्ति?

(ख) अस्माभिः किं करणीयम् अस्ति?

(ग) 'अत्यधिकम्' इत्यस्य पयार्यपदं श्लोकात् चित्वा लिखत।

**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(क) 'निर्मलं जलम्' अनयोः पदयोः विशेषणं किम् ?

(ख) 'निर्मलं' इत्यस्य पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

(ग) 'संसारम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **5**

काकः - रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिका:? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।

गजः- समीपतः एवागच्छन्। अरे! अरे! सर्वां वार्तां श्रृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि। वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।

वानरः - अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x2=1**

(क) कः करुणापरः अस्ति?

(ख) कः विशालकायः अस्ति?

(ग) कस्य शुण्ड: अस्ति?

**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** **1x2=2**

(क) क: सिंहं शुण्डेन मारयिष्यति?

(ख) क: गजस्य पुच्छं विधूय वृक्षोपरि आरोहति?

(ग) क: पिकस्य सन्ततिम् पालयति?

**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** **1x2=2**

(क) 'पिकाः' इत्यस्य कर्तृपदस्य क्रियापदं किम्?

(ख) 'अहम् एव योग्यः वनराजपदाय' वाक्येऽस्मिन् अव्ययपदं किम् ?

(ग) 'करुणापरः पक्षिसम्राट् काकः' एषु पदेषु विशेष्यपदं किम्?

**15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत-(केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) विद्यालये अध्यापका: <u>छात्रान्</u> अध्यापयन्ति।

(ii) आरक्षी <u>चौरेभ्य:</u> त्रायते।

(iii) <u>मानवै:</u> सदा सत्यं वक्तव्यम्।

(iv) <u>श्रृगालेन</u> सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।

(v) परम् अर्थकार्श्येन पीडित: स: <u>बसयानं</u> विहाय पदातिरेव प्राचलत्।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -** **1x4=4**

**वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।**

**स केनापि प्रकारेण परैर्न परिभूयते ॥**

अन्वयः - (यः) मन्त्री (i)..........., धैर्यवान्, सभायाम् (ii).......... अपि, सः परैः (iii).......... अपि प्रकारेण न (iv).........।

**मञ्जूषा**

| |
|---|
| वाक्पटुः, परिभूयते, अकातरः, केन |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**

**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥8॥**

भावार्थः - विदुषाम् कथनम् अस्ति यत् (i)..................... प्रथम: धर्मः वर्तते। इति कथनं (ii)......... धारणीयम्। अस्माभि: (iii)........... अपि अधिक सावधानतया सदाचारस्य (iv)........ विशेषरूपेण करणीया।

**मञ्जूषा-**

| |
|---|
| **रक्षा, मनसि, आचारः, प्राणेभ्यः** |

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत –** **½ x8=4**

(i) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(ii) कश्चित् धूर्तः श्रृगालः हसन् अवदत्।

(iii) त्वं मानुषादपि बिभेषि।

(iv) व्याघ्रः भयाकुलचित्तो नष्टः।

(v) भवान् कुतः भयात् पलायितः?

(vi) अयमेकस्तावद् एव विभज्य भुज्यताम्।

(vii) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः?

(viii) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत (केवलं प्रश्नत्रयम्) 1 x3 =3**

(i) **दुर्वहम्** अत्र जीवितं जातं प्रकृतिरव शरणम्।

(क) दुष्टम् (ख) दु:खम् (ग) कठिनम्

(ii) प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो माम् **अत्तुम्** कलहायमानौ चपेटया प्रहरन्ती दृष्टा।।

(क) मारयितुम् (ख) भक्षयितुम् (ग) आगन्तुम्

(iii) कृषक: तं वृषभं **तोदनेन** नुद्यमान: अवर्तत।

(क) दानेन (ख) कष्टप्रदानेन (ग) भयेन

(iv) गुह्यम् **आख्याति।**

(क) खादति (ख) भक्षयति (ग) वदति

(v) य: इच्छति आत्मन: श्रेय: **प्रभूतानि** सुखानि च।

(क) बहूनि (ख) धनानि (ग) न्यूनानि